# Matsyastutih

# मत्स्यस्तुतिः

## Document Information

Text title : matsyastutiH

File name : matsyastutiH.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# मत्स्यस्तुतिः

मग्ने मेरौ पतति तपने तोयबिन्दाविवेन्दौ
अन्तर्लीने जलधिसलिले व्याकुले देवलोके ।
मात्स्यं रूपं मुखपुटतटाकृष्टनिर्मुक्तवार्धि
श्रीकान्तस्य स्थलजलगतं वेत्यलक्ष्यं पुनातु ॥ १॥

वियत्पुच्छातुच्छोच्छलितजलगर्भं निधिरपां
अपान्नाथः पाथः पृथुलवदुस्थो वियदभूत् ।
निधिर्भासामौर्वो दिनपतिरभूदौर्वदहनः
चलत्काये यस्मिन्स जयति हरिर्मीनवपुषा ॥ २॥

जीयासुः शकुलाकृतेर्भगवतः पुच्छच्छटाच्छोटनात्
उद्यन्तः शतचन्द्रिताम्बरतलं ते बिन्दवः सैन्धवाः ।
यैर्व्यावृत्य पतद्भिरौर्वशिखिनस्तेजोजटालं वपुः
पानाध्मानवशादरोचकरुजां चक्रे चिरायास्पदम् ॥ ३॥

दिश्याद्वः शकुलाकृतिः स भगवान्नैःश्रेयसीं सम्पदं
यस्य स्फूर्जदतुच्छपुच्छशिखरप्रेङ्खोलनक्रीडनैः ।
विष्वग्वार्धिसमुच्छलज्जलभरैर्मन्दाकिनीसङ्गतैः
गङ्गासागरसङ्गमप्रणयिनी जाता विहायःस्थली ॥ ४॥

मायामीनतनोस्तनोतु भवतां पुण्यानि पङ्कस्थितिः
पुच्छाच्छोटसमुच्छलज्जलगुरुप्राग्भाररिक्तोदधेः ।
पातालावटमध्यसङ्कटतया पर्याप्तकष्टस्थितेः
वेदोद्धारपरायणस्य सततं नारायणस्य प्रभोः ॥ ५॥

जृम्भाविस्तृतवक्त्रपङ्कजविधेर्हृत्वा श्रुतीः सागरे
लीनं त्रस्तसमस्तनक्रनिकरं शङ्खं जघानाजिरे ।
पुच्छोत्क्षिप्तजलोत्करैः प्रतिदिशं सन्तर्प्य यो वै धरां
पायाद्वः स मृणालकोमलतनुर्मीनाभिधानो हरिः ॥ ६॥

हंहो मीनतनो हरे किमुदधे किं वेपसे शैत्यतः
स्विन्नः किं वडवानलात्पुलकितः कस्मात्स्वभावादहम् ।
इत्थं सागरकन्यकामुखशशिव्यालोकनेनाधिक-
प्रोद्यत्कामजचिह्ननिह्नुतिपरः शौरिः शिवायास्तु वः ॥ ७॥

पुच्छं चेदहमुन्नयाम्यनवधिस्तुच्छो भवेदम्बुधिः
क्रीडां चेत्कलये मनागपि जले पीडा परं यादसाम् ।
निस्पन्दो भृशमामृशन्निति भरब्रह्माण्डभाण्डक्षय-
क्षोभाकुञ्चितवेष एष भगवान्प्रीणातु मीनाकृतिः ॥ ८॥

चन्द्रादित्योरुनेत्रः कमलभवभवस्फारपृष्ठप्रतिष्ठो
भास्वत्कालाग्निजिह्मः पृथुलगलगुहादृष्टनिःशेषविश्वः ।
अद्भिः पुच्छोत्थिताभिश्चकितसुरवधूनेत्रसंसूचिताभिः
मत्स्यश्छिन्नाब्धिवेलं गगनतलमलं क्षालयन्वः पुनातु ॥ ९॥

यं दृष्ट्वा मीनरूपं स्फुरदनलशिखायुक्तसंरक्तनेत्रं
लोलद्विस्तीर्णकर्णक्षुभितजलनिधिं नीलजीमूतवर्णम् ।
श्वासोच्छ्वासानिलौघैः प्रचलितगगनं पीतवारिं मुरारिं
दिङ्मूढोऽभूत्स शङ्खः स भवतु भवतां भूतये मीनरूपः ॥ १०॥

दिङ्मूढं तं सुरारिं किल शितदशनैः पीड्यमानं रटन्तं
हत्वा तीरे पयोधेः करतलकलितं पूरयामास शङ्खम् ।
नादेनाक्षोभ्य विश्वं प्रमुदितविबुधं त्रस्तदैत्यं स देवैः
दत्तार्घः पद्मयोनेः प्रहसितवदनः पातु वो दत्तवेदः ॥ ११॥

इति मत्स्यस्तुतिः सम्पूर्णा ।

Proofread by PSA Easwaran

*Matsyastutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*